श्रीश्री हरिः शरणम् ॥

# श्रीश्री ब्रह्म संहिता

ईश्वरः परमः कृष्णः
सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः
सर्व कारणकारणम् ॥१॥

चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तम्।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥२॥

वेणुं क्वणन्तमरविन्ददलायताक्षं
बर्हावतंसमसिताम्बुदसुन्दराङ्गम्।
कन्दर्पकोटिकमनीयविशेषशोभं
गोविन्दमादि पुरुषं तमहं भजामि ॥३॥

आलोलचन्द्रक लसद् वनमाल्यवंशी-
रत्नाङ्गदं प्रणयकेलिकलाविलासम्।
श्यामं त्रिभङ्गललितं नियतप्रकाशं
गोविन्दमादि पुरुषं तमहं भजामि ॥४॥

अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति।
आनन्दचिन्मयसदुज्ज्वलविग्रहस्य
गोविन्दमादि पुरुषं तमहं भजामि ॥५॥

अद्वैतमच्युतमनादिमनन्तरूप-
माद्यं पुराणपुरुषं नवयोवनञ्च।
वेदेषु दुर्लभमदुर्लभमात्मभक्तौ
गोविन्दमादि पुरुषं तमहं भजामि ॥६॥

पन्थास्तु कोटिशतवत्सरसंप्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानाम्।
सोऽप्यस्ति यत्प्रपदसीम्न्यविचिन्त्यतत्त्वे
गोविन्दमादि पुरुषं तमहं भजामि ॥७॥

एकोऽप्यसौ रचयितुं जगदण्डकोटिं
यच्छक्तिरस्ति जगदण्डचया यदन्तः।
अण्डान्तरस्थपरमाणुचयान्तरस्थं
गोविन्दमादि पुरुषं तमहं भजामि ॥८॥

यद्भावभावितधियो मनुजास्तथैव
संप्राप्य रूपमहिमासनयानभूषाः।
सूक्तैर्यमेव निगमप्रथितैः स्तुवन्ति
गोविन्दमादि पुरुषं तमहं भजामि ॥९॥

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपतया कलाभिः।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादि पुरुषं तमहं भजामि ॥१०॥

प्रेमाञ्जनच्छुरितभक्तिविलोचनेन
सन्तः सदैव हृदयेषु विलोकयन्ति।
यं श्यामसुन्दरमचिन्त्यगुणस्वरूपं
गोविन्दमादि पुरुषं तमहं भजामि ॥११॥

रामादिमूर्तिषु कलानियमेन तिष्ठन्
नानावतारमकरोद्भुवनेषु किन्तु।
कृष्णः स्वयं समभवत् परमः पुमान् यो
गोविन्दमादि पुरुषं तमहं भजामि ॥१२॥

यस्य प्रभा प्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम्।
तद् ब्रह्मनिष्कलमनन्तमशेषभूतं
गोविन्दमादि पुरुषं तमहं भजामि ॥१३॥

माया हि यस्य जगदण्डशतानि सूते
त्रैगुण्यतद्विषयवेदवितायमाना।
सत्त्वावलम्बिपरसत्त्वविशुद्धसत्त्वं
गोविन्दमादि पुरुषं तमहं भजामि ॥१४॥

आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफलन् स्मरतामुपेत्य।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादि पुरुषं तमहं भजामि ॥१५॥

गोलोकनाम्नि निजधाम्नि तले च तस्य
देवी महेश-हरि-धामसु तेषु तेषु।
ते ते प्रभावनिचया विहिताश्च येन
गोविन्दमादि पुरुषं तमहं भजामि ॥१६॥

सृष्टिस्थितिप्रलयसाधनशक्तिरेका
छायेव यस्य भुवनानि बिभर्ति दुर्गा।
इच्छानुरूपमपि यस्य च चेष्टते सा
गोविन्दमादि पुरुषं तमहं भजामि ॥१७॥

क्षीरं यथा दधि विकारविशेषयोगात्
सञ्जायते न हि ततः पृथगस्ति हेतोः।
यः शम्भुतामपि तथा समुपैति कार्याद्-
गोविन्दमादि पुरुषं तमहं भजामि ॥१८॥

दीपार्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतुसमानधर्मा।
यस्तादृगेव हि च विष्णुतया विभाति
गोविन्दमादि पुरुषं तमहं भजामि ॥१९॥

यः कारणार्णवजले भजति स्म योग-
निद्रामनन्तजगदण्डसरोमकुपः।
आधारशक्तिमवलम्व्य परां स्वमूर्तिं
गोविन्दमादि पुरुषं तमहं भजामि ॥२०॥

यस्यैकनिश्वसितकालमथावलम्ब्य
जीवन्ति लोमविलोजा जगदण्डनाथाः।
विष्णुर्महान् स इह सस्य कलाविशेषो
गोविन्दमादि पुरुषं तमहं भजामि ॥२१॥

भास्वान् यथाश्मशकलेषु निजेषु तेजः
स्वीयं कियत् प्रकटयत्यपि यद्वदत्र।
ब्रह्मा य एष जगदण्डविधानकर्ता
गोविन्दमादि पुरुषं तमहं भजामि ॥२२॥

यत् पादपल्लवयुगं विनिधाय कुम्भ-
द्वन्द्वे प्रणामसमये स गणाधिराजः।
विघ्नान् विहन्तुमलमस्य जगत्त्रयस्य
गोविन्दमादि पुरुषं तमहं भजामि ॥२३॥

अग्निर्मही गगनमम्बु मरुद्दिशश्च
कालस्तथात्ममनसीति जगत्त्रयाणि।
यस्माद्भवन्ति विभवन्ति विशन्ति यञ्च
गोविन्दमादि पुरुषं तमहं भजामि ॥२४॥

यच्चक्षुरेष सविता सकलग्रहाणां
राजा समस्तसुरमूर्तिरशेषतेजाः।
यस्याज्ञया भ्रमति संभृतकालचक्रो
गोविन्दमादि पुरुषं तमहं भजामि ॥२५॥

धर्मोऽथ पापनिचयः श्रुतयस्तपांसि
ब्रह्मादिकीटपतगावधयश्च जीवाः।
यद्दत्तमात्रविभवप्रकटप्रभावा
गोविन्दमादि पुरुषं तमहं भजामि ॥२६॥

यस्त्विन्द्रगोपमथवेन्द्रमहो स्वकर्म-
बन्धानुरूपफलभाजनमातनोति।
कर्माणि निर्दहति किन्तु च भक्तिभाजां
गोविन्दमादि पुरुषं तमहं भजामि ॥२७॥

यं क्रोधकामसहजप्रणयादिभीति-
वात्सल्यमोहगुरुगौरवसेव्यभावैः।
सञ्चित्य तस्य सदृशीं तनुमापुरेते
गोविन्दमादि पुरुषं तमहं भजामि ॥२८॥

श्रियः कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतम्।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दं ज्योतिः परमपि तदास्वाद्यमपि च॥ २९॥

स यत्र क्षीराब्धिः स्रवति सुरभीभ्यश्च सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥३०॥